SAMVARDHINI
PEER REVIEWED MULTILINGUAL E-RESEARCH JOURNAL
(ISSN ONLINE: - 2583-7176)
https://samvardhini.in
https://www.samskritpromotion

SAMVARDHINI :- 01/06/2026
Volume – 8
Issue – 1
(ISSN ONLINE:- 2583-7176)
https://samvardhini.in

# भारतीयचिन्तनपद्धतौ शास्त्रीयनृत्यस्य परिकल्पना

*Dr. P. R. Archana*

**शोधलेखसारः –**

*भारतीयललितकलास्वस्ति नृत्यकलायाः अतीव वैशिष्ट्यम् । क्रीडनीयकप्रकृतिविशिष्टस्य नाट्यस्य आनन्दजनकत्वं तु स्वतः सिद्धम् । भरतखण्डेऽस्मिन् नृत्यस्य नानाप्रकाराः देशभेदेन अवलोक्यन्ते । परन्तु सर्वेषामपि नृत्यप्रकाराणां मूलं भवति शास्त्रीयनृत्यम्, यच्च नाट्यशास्त्रादिग्रन्थेषु विस्तृतरूपेण प्रतिपादितम् । तादृशस्य शास्त्रीयनृत्यस्य उगमः, प्रवर्धनम्, स्वरूपकथनञ्च विस्तरेणात्र लेखे प्रस्तुतम् ॥*

**कुञ्चिकापदानि** – नाट्यम्, लास्यम्, नृत्तम्, नृत्यम्, ताण्डवम्, अभिनयः, रसः, नटराजः, कुचुपुडि, शिलाली ॥

**Dr. P. R. Archana Karanth**
Guest Lecturer, Dept. Of Vyakarana
Karnataka Samskrit University
Bengaluru
Email – archanakaranth6@gmail.com

## Classical Theatre through the lens of Indian thought

Nāṭyakalā or the art of Theatre is a very special aspect of Indian performing arts. It offers a unique and self-evident delight that needs no justification. India/Bhāratam showcases a rich diversity of dance forms that vary across different regions. Nonetheless, the foundation of all Indian dance forms lies in classical traditions, as outlined in the Nāṭya Śāstra. The origin, development, and intrinsic nature of classical dance are thoroughly explored in this research paper.

This present paper explores the roots of Indian theatre as reflected in the Vedas, with a focus on its Vyākaraṇa elements and associated Sūtras. The classification of Nāṭya Śāstra as the Panchama Veda is substantiated with citations from a range of classical sources.

A concise introduction is provided to the three branches of classical theatre: Nṛttam, Nrityam, and Nāṭyam. This work further examines the significance of acting within Indian classical dance. In conclusion, this study asserts that Nāṭyakalā serves as a medium for promoting the welfare of humanity.

## भारतीयनृत्यस्य भूमिका

"**नाट्यं भिन्नरुचेर्जनस्य बहुधाप्येकं समाराधनम्**" इत्युक्तदिशा[१] नाट्यमिदं मानवकुलस्य अविभाज्यमङ्गम्। भाषायाः उगमात्प्रागेव नेत्रयोः कम्प्रः, भावाभिनयः, पाणिपादस्य चलनमित्यादिकानि सङ्केतानि स्वाभिप्रायस्याभिव्यक्त्यये उपयुज्यमानान्यासन्। तत्र आन्तरिकभावप्रकाशनसाधनं भवति भाषा। सङ्गीत-नृत्यादीनि ललितकलानि आनन्दाभिव्यक्तिहेतवः भवन्ति। भाषायाः परम्परायाश्च यादृशरीत्या अभिवृद्धिर्जाता तद्वदेव नृत्यादि कलानामपि कालक्रमेण सुव्यवस्थितरूपेण विन्यासः जातः।

नृती गात्रविक्षेपे इति धातोः "**ऋधुपधाच्चाक्लृपिचृतेः**"[२] इत्यनेन क्यप् प्रत्ययेन निष्पन्नः नृत्यशब्दः तालमानरसाश्रयसविलासाङ्गविक्षेपरूपमर्थं ब्रवीति। "**ताण्डवं नटनं नाट्यं लास्यं नृत्यं च नर्तनम्**"[३] इति अमरकोशे नाट्यपर्यायवाचकाः शब्दाः उपात्ताः। यद्यपि कोशप्रयुक्तानां समेषामपि शब्दानां सूक्ष्मरीत्या अर्थभेदः नाट्यग्रन्थेषु विक्रियते अथापि तादृशार्थव्यत्ययमनादृत्य अमीषां शब्दानां नाट्यपर्यायत्वेन कोशकारः अभ्युपगच्छत्। आचार्यः धनञ्जयः दशरूपके नाट्यस्य 'रूपक' इति शब्दप्रयोगं चकार। उक्तं हि तेन – "**आनन्दनिस्यन्दिषु रूपकेषु व्युत्पत्तिमात्रं फलमल्पबुद्धिः**" इति[४]।

भारतीयनृत्यपरम्परयाः विशिष्टा, भावनात्मिका काचित् पृष्ठभूमिका अवलोक्यते। यद्यपि सर्वासां नृत्यानां मूलमेकविधमेव अथापि तत्तद्देशानुसारं नृत्यप्रकाराः भिद्यन्ते। कलात्वेन अभिधीयमानाः नृत्यकला, सङ्गीतम्, शिल्पकला, चित्रकला, नाटकादयः परस्परं विभिन्नाः। अथाप्यासां सर्वासां कलानां भारतीयज्ञानपरम्परायाः विचारतत्त्वोपस्थापनरूपं मुख्यमुद्देश्यं तु समानमेव। विबुधानां प्रीत्यर्थम्, देवानामाराधनार्थमेताः नृत्यादि-कलाः प्रवृत्ताः।

पुराकाले प्रवृत्तासु धर्माचरणपद्धतिषु सङ्गीतकला, नृत्यकला च अन्यतमे आस्ताम्। भगवतः आराधनार्थं प्रवृत्तेषु षोडशोपचारविधिषु सङ्गीतनृत्येप्यन्तर्भवतः। अप्सरा इति शब्देन अभिधीयमानाः देवताः नृत्यकलायां, गन्धर्वनाम्ना प्रोच्यमानाः देवाः गायनकलायां निष्णाताः आसन्। तेषां कश्चन समूहः देवतानाम् ऋषीणाञ्च तोषणार्थं सर्वदा तत्कर्मसु निरतो भवति स्म। नाटकानामाविर्भावात्प्रागेव नाट्यस्य आविर्भावः जात इति वैदिकप्रमाणैः निश्चीयते।

नाट्यशास्त्रस्य आद्यः उल्लेखः ऋग्वेदे दृश्यते। शिल्पशास्त्रम्, सङ्गीतम्, नाट्यकला इत्यासां तिसृणां **शिल्पक** इति नाम्ना व्यवहारस्तत्रावलोक्यते। उक्तं हि – "**त्रिविधो शिल्पं नृत्यं गीतं वादित्रयञ्च**" इति। ऋग्वेदे[५] नृत्यदेवताः "**नृत्यमानामृत**" शब्देन सम्बोधिताः। तद्वदथर्ववेदे नृत् इत्यस्य शब्दस्य प्रयोगः दृश्यते[६]। "**यास्यम् गायन्ति नृत्यन्ति भूम्यम् मर्त्यम्**" इति अथर्ववेदस्य पृथिवीसूक्ते निगदितम्। पुरा यागादि कर्मसु क्रियमाणेषु सत्सु नृत्यार्थं सूतानां, गीतगायनार्थं शैलूशनामकजनानां नियोजनं क्रियते

स्म । तैत्तिरीयसंहितायाः ताण्ड्यब्राह्मणे, ऐत्तिरीयारण्यके, बौद्धायनश्रौतसूत्रेषु, आपस्तम्भश्रौतसूत्रेषु, कात्यायनश्रौतसूत्रेषु च शास्त्रीयनृत्यसम्बद्धाः विषयाः बाहुल्येन निरूपिताः वर्तन्ते । अष्टौ नर्तक्यः मिलित्वा शिरसि कुम्भं धरन्त्यः नृत्यन्ति स्म इति ऐत्तिरीयारण्यके[७] अस्त्युल्लेखः ।

**नाट्यवेदस्य परिचयः** –

नाट्यशास्त्रस्य मूलं वेदाः एव । अत एवास्य "**पञ्चमवेदः**" इति नामान्तरम् । उक्तं हि –

**"सर्वशास्त्रार्थसम्पन्नं सर्वशिल्पप्रवर्तकम् ।**
**नाट्यशास्त्रं पञ्चमं वेदं सेतिहासं करोम्यहम्"[८] ॥ इति ॥**

चतुर्भ्यः वेदेभ्यः केचन भागाः चित्वा सृष्टिकर्त्रा ब्रह्मणाऽयं नाट्यवेदः समारब्ध इति प्रतीतिः । तत्र ऋग्वेदात् कविताभागः, देवतानां सम्भाषणम्, देवतास्तुतयः नाट्यवेदेऽन्तर्भाविताः । यजुर्वेदात् नृत्यभङ्ग्यः, अभिनयसम्बन्धिनः भावाश्च स्वीकृताः । नृत्योपयोगिसङ्गीतभागः सामवेदात्, रसनिरूपणश्च अथर्ववेदात्स्वीकृत्य नाट्यवेदस्य संपूर्णस्वरूपं विन्यस्तम् । उक्तं हि –

**"जग्राह पाठ्यं ऋग्वेदात् सामभ्यो गीतमेव च ।**
**यजुर्वेदादभिनयात् रसानाथर्वणादपि"[९] ॥ इति ।**

विविधेषु सन्दर्भेषु पृथक्पृथगुद्देश्यान् मनसि विधाय देवा अपि नृत्यमकार्षुरित्यंशः पुराणानामवलोकनेन ज्ञायते । नाट्यस्यास्य प्रधानदेवः भवति भगवान् कैलासाधिपतिः परमेश्वरः । नाट्यशास्त्रे स च शिवः **नटराज** इति नाम्ना व्यवह्रियते । सृष्टि-स्थिति-लयानां प्रतिनिधिभूतं शिवस्य ताण्डवनृत्यम्, यच्च अत्यन्तमुग्रं, शक्तियुतञ्च भवति । शिवस्य चारस्तण्डुः । तण्डोः इदं ताण्डवमिति तद्व्युत्पत्तिः । दैविकनृत्यस्यास्य ताण्डवनृतस्य सप्त प्रकाराः सन्ति । एतेषु सप्तसु प्रकारेषु जगतः समस्तापि प्रक्रिया तिरोहिता । शाण्डिल्यकृते शिवप्रदोषस्तोत्रे शिवनृत्यमित्थं समुपवर्णितं यत् – "सरस्वती वीणां वादयन्ती स्थिता आसीत्, इन्द्रः वेणुवादकश्चासीत्, ब्रह्मा च तालं वादयते स्म, सरस्वती च गायने रता आसीत्, विष्णुश्च मृदङ्गं वादयन् स्थित आसीत्, अन्ये च देवताः शिवं परितः स्थित्वा तस्य च भावावेषणमीक्षन्तः तस्मिन् प्रदोषसमये आनन्दपरवशाः सञ्जाताः" इति ॥ उक्तं हि तत्र –

**नृत्यं विधातुमभिवाञ्छति शूलपाणौ ।**
**देवाः प्रदोषसमयेऽनुभजन्ति सर्वे ॥**
**वाग्देवी धृतवल्लकी शतमखो वेणुं दधत्पद्मजः**
**तालोन्निद्रकरो रमा भगवती गेयप्रयोगान्विता ।**
**विष्णुः सान्द्रमृदङ्गवादनपटुर्देवाः समन्तात् स्थिताः ।**
**सेवन्ते तमनु प्रदोषसमये देवं मृडानीपतिम्[१०] ॥**

व्याकरणशास्त्रस्य निदानभूतानि माहेश्वरसूत्राणि परमेश्वरकृतनृत्तस्य अन्त्ये निनादितेन ढक्कानादेन समुद्भूता इति प्रतीतिः । उक्तं हि –

**"नृत्तावसाने नटराजराजो ननाद ढक्कां नव पञ्च वारम् ।**
**उद्धर्तुकामः सनकादिसिद्धानेतद्विमर्शे शिवसूत्रजालम्[११] ॥" इति ।**

पार्वत्यपि श्रेष्ठा नर्तकी आसीत् या च नृत्यस्य लास्याख्यभागस्य च प्रवर्तिका । एषापि बहुषु सन्दर्भेषु नृत्यम् अनृत्यदिति पुराणाद्यवलोकनेन ज्ञायते । किञ्च गोपिकास्त्रियः, भगवान् वासुदेवः, देवराजः इन्द्रः, दिक्पालकाः, मोहिनीरूपधारी विष्णुः इत्येवं देवाः – देवताश्च नर्तकत्वेन नर्तकीत्वेन च दृष्टाः । तत्रापि अप्सराः, गन्धर्वाः, विद्याधराश्च दैविककलायां निष्णाताः आसन् । रामायणे, महाभारते, भागवते च सङ्गीत-नाट्य-नाटकानां बाहुल्येन उल्लेखः दृश्यते । सीतास्वयंवरे रावणः शिवस्य स्तवनार्थं वीणावादनं चकार । तद्वत् रावणस्य पत्नी मण्डोदरी सङ्गीते नाट्ये च अतीव निपुणासीदिति श्रूयते । अधुनापि **कुचुपुडि** नृत्यप्रकारस्य मण्डूकशब्दनृत्ये रावण-मण्डोदर्योः उल्लेखः समुपलभ्यते । भगवतः श्रीरामचन्द्रस्य जननसमये अयोध्यावासिनः स्वसन्तोषं सङ्गीत-नृत्याभ्यां प्राकाशिषत । तद्वदेव रामराज्यात् विच्युतायाः सीतायाः कथाम् वाल्मीकमहर्षिः गायनरूपेण लव-कुशयोः कृते श्रावयामास । महाभारतेऽपि युवराजाः समेऽपि ललितकलायां निपुणाः आसन्निति तदवलोकनेन ज्ञायते । तत्रापि उलूपिचित्राङ्गदे

नृत्यकलायामतीव निपुणौ आस्ताम् । पाण्डवेष्वन्यतमः अर्जुनः अज्ञातवाससमये स्वस्य निजरूपं गोपयित्वा नर्तकीत्वेव रूपं धरन्, **बृहन्नला** इति नाम्ना विराटनगरस्य उत्तरा नाम्न्याः राजकुमार्याः कृते नृत्याध्यापनमकार्षीत् ।

पाणिनेः अष्टकेऽपि "**पारशर्यशिलालिभ्यां भिक्षुनटसूत्रयोः**[१२]" ,"**कर्मकृशाश्वादिनिः**[१३]" सूत्रयोः शिलाली – कृशाश्वेति द्वयोः नटसूत्रयोरुल्लेखः दृश्यते । एभिः प्रमाणैः नृत्यकलायाः प्राचीनतमत्वम्, प्रचुरतरत्वञ्च निरूपयितुं शक्यते । महाभाष्यकारः पतञ्जलिरपि अभिनयविषयमित्थं प्रस्तौति महाभाष्ये यथा – "ये तावदेते शौभिका नाम एते प्रत्यक्षं कंसं घातयन्ति प्रत्यक्षं च बलिं बन्धयतीति । ग्रन्थिका अपि तेषामुत्पत्तिप्रभृत्याविनाशात् तद्वृद्धीर्व्याचक्षाणाः सतो बुद्धिविषयान् प्रकाशयन्ति । व्यामिश्राश्च दृश्यन्ते - केचित् कंसभक्ताः भवन्ति, केचित् वासुदेवभक्ताः । वर्णान्यत्वं खल्वपि पुष्यन्ति - केचित् कालमुखाः भवन्ति, केचित् रक्तमुखाः" इति[१४] । अन्यत्रापि अभिनेतुरभिनेत्र्योः प्रस्तुतिं कुवन्नाह – "व्यञ्जनानि पुनः नटभार्यावद्भवन्ति । तद्यथा - नटानां स्त्रियो रङ्गगताः यो यः पृच्छति कस्य यूयं कस्य यूयमिति तं तं तव तवेत्याहुः । एवं व्यञ्जनान्यपि यस्य यस्याचः कार्यमुच्यते तं तं भजन्ते ॥" इति[१५] ।

## भरतस्य नाट्यशास्त्रम्

नाट्यशास्त्रस्य प्रवक्तृत्वेन शिलालिः, कृशास्वः, तण्डुः, ब्रह्मा, वासुकिः, नारदः, व्यासः, आञ्जनेयप्रभृतयः बहवः शास्त्रकाराः वर्तन्ते । परन्तु प्रसिद्धः नाट्यशास्त्रकारः भवति भरतमुनिः । तत्कृतः नाट्यशास्त्राख्यः ग्रन्थः नाट्यशास्त्रस्य अतिप्राचीनतमः अत्यन्तक्रमपूर्वकः, युक्तियुक्तश्च । स एव ग्रन्थः तदुत्तरमभिहितानां नाट्यग्रन्थानां प्रमाणभूतम् । संस्कृतवाङ्मये भरत इति नाम्ना पञ्च जनाः प्रसिद्धाः । १) जडभरतः । २) मान्धातस्य प्रपौत्रः भरतः । ३) दाशरथिः भरतः ४) दौष्यन्तिः भरतः ५) नाट्यशास्त्रकारः । अस्मिन् ग्रन्थे ३६,००० श्लोकाः उपनिबद्धाः आसन्निति यमलाष्टकतन्त्रे निरूपितम् । परन्तु सम्प्रत्यस्मिन् ग्रन्थे ६,००० श्लोकाः समुपलभ्यन्ते । एते च श्लोकाः ३६ अध्यायेषु विभक्ताः । नाट्यकलायाः शंसनं कुर्वन् भरतः निगदति यत् –

**"न तच्छ्रुतं न तच्छिल्पं न सा विद्या न सा कला ।**
**न स योगो न तत्कर्म यन्नाट्येऽस्मिन्न दृश्यते"[१६] ॥ इति ॥**

किञ्च "**सप्तद्वीपानुकरणं नाट्यमेतद्भविष्यति**" इति कथनपूर्वकं नृत्यस्य सूक्ष्मातिसूक्ष्मरूपेण विवेचनं तेन कृतम् । तत्र प्रथमाध्याये नाटकस्य उत्पत्तिर्वर्णिता भरतेन । द्वितीये विकृष्ट-चतुरस्र-त्रिकोणेति त्रयाणां प्रेक्षागृहाणां निरूपणं दृश्यते यच्च नाट्यशास्त्रस्य वास्तुचित्रणं दास्यति । तृतीये रङ्गदेवतानां पूजापद्धतिः, चतुर्थे ताण्डवनृत्यस्य प्रस्तुतिः, पञ्चमे पूर्वरङ्गविधानस्य वर्णनम्, नान्दी-प्रस्तावनयोः विवरणञ्च दृश्यते । षष्ठे अध्याये रसस्य भावस्य च सम्बन्धनिरूपणम्, तन्मूलकस्य "**विभावानुभावव्यभिचारसंयोगाद्रसनिष्पत्तिः**" इति सूत्रस्य विवरणं च वर्तते । सप्तमे स्थायि-व्यभिचारि-सञ्चारिभावानां विस्तृतं निरूपणं च दृश्यते । आङ्गिक-सात्त्विक-वाचिक-आहार्येति चत्वारः अभिनयप्रकाराः निरूपिताः उपाङ्गविधानमित्याख्ये अष्टमे अध्याये । नवमे दशमे च यथाक्रमं हस्ताभिनयस्य, शरीराभिनयस्य च वर्णनं दृश्यते । एकादशे चारीविधानवर्णनं कृतम्[१७] । द्वादशे – त्रयोदशे च मण्डलविघातस्य, गतिप्रचारस्य च निरूपणं दृश्यते । प्रवृत्तिधर्मव्यञ्जनाख्ये चतुर्दशे अध्याये रङ्गमञ्चस्य कक्ष्याणामुपस्थापनं क्रियते ।

पञ्चदशाध्यायात्प्रभृति नवदशाध्यायपर्यन्तं वाचिकाभिनयस्य विस्तृतं वर्णनं कृतमस्ति । सर्वेषामप्यभिनयानां मूलस्वरूपिण्याः वाण्याः स्तवनं इत्थमकारि तत्र – "**तस्माद्वाचः परं नास्ति वाग्घि सर्वस्य कारणम्**" इति । दशरूपविधाननामके विंशतितमे अध्याये नाटकानामेकादशप्रकाराः उपवर्णिताः । तदुत्तरं इतिवृत्त-कथावस्तुनोः वर्णनम्, भारती - सात्त्वती - कैशिकी - आरभटीति चतसृणां वृत्तीनां निरूपणम्, आहार्याभिनयस्य वर्णनम्, सामान्याभिनयस्य परिचयः, वेश्य-वैशिकयोः सम्बन्धनिरूपणम्, चित्राभिनयवर्णनम्, नाट्यस्याभिनये उपकरणानां सिद्धिः इत्यादि विषयाः उत्तरोत्तराध्यायेषु चर्चिताः । अष्टाविंशत्यध्यायादारभ्य त्रयस्त्रिंशदध्यायपर्यन्तं नाट्यशास्त्रेण अविनाभावसम्बन्धवतः सङ्गीतशास्त्रस्य विषयाः सविस्तरं चर्चिताः । त्रयस्त्रिंशत्तमे अध्याये नाट्यस्य मूलस्रोतसोः नायक-नायिकयोः स्वरूपचित्रणं कृतम् । उपान्त्ये अध्याये नाटके विद्यमानानां सूत्रधार-पारिपार्श्विक-विदूषकादिरूढपात्राणां लक्षणं निरूपितम् । अन्तिमे अध्याये नाट्यावतारः कथं समजनीति सविस्तरं निरूपितं वर्तते । अस्य नाट्यशास्त्रस्य प्रसिद्धं व्याख्यानं भवति "अभिनवभारती" नामिका या च अभिनवगुप्तेन विरचिता । एतद्ग्रन्थमतिरिच्य अभिनयदर्पणम्, भावप्रकाशनमित्यादयः अपि नाट्यग्रन्थाः संस्कृतवाङ्मये विलसन्ति ।

## नाट्यतन्त्राणि

नृत्तम्, नृत्यम्, नाट्यम्, ताण्डवम्, लास्यम्, मार्गी, देशी, अभिनयः हस्तम् इत्यादीनि नाट्यशास्त्रस्य पारिभाषिकपदानि। एभिः शब्दैः नाट्यस्य संपूर्णपरिकल्पना दीयते। नाट्यशास्त्रमधिकृत्य भरतार्णवः, अभिनयदर्पणम्, सङ्गीतरत्नाकरः, नाट्यशास्त्रसंग्रहः इत्यादयः ग्रन्थाः अपि विलसन्ति। सर्वेषामपि ग्रन्थानामवलोकने कृते सति भारतीयनाट्यकलायाः त्रयः मुख्याः विभागाः दृश्यन्ते, यथा,

१) नृत्तम्  २) नृत्यम्  ३) नाट्यम्। इति।

ताण्डवम् – लास्यमित्यपरोऽपि विभागः अत्रार्थे दृश्यते। एवमेव मार्गी – देशीति प्रकारद्वैविध्यमपि नाट्यग्रन्थेषु दृश्यते।

**नृत्तम्** – तालानुसारं क्रियमाणम् अलङ्कारप्रधानं नृत्यं नृत्तमित्यभिधीयते। वैयाकरणमूर्धन्येन कौमुदीकारेण भट्टोजिदीक्षितेन "**व्यथो लिटि**"[१८] इति सूत्रनिरूपणावसरे नृत्य – नृत्तयोः अर्थव्यत्यासः एवं प्रादर्शि – "**पदार्थाभिनयः नृत्यम्। गात्रविक्षेपमात्रं नृत्तम्**" इति। एषः प्रकारः शुद्धनाट्यत्वेनाभिधीयते। पाणिपादयोः चलनमाश्रित्य समयानुसारं स्थलानुसारञ्च क्रियमाणः नृत्यप्रकारः नृत्तम्। अस्मिन् प्रकारे कटि-करण-मण्डल-अङ्गहारादीनि तन्त्राण्युपयुज्यन्ते। अत्र च "**चारि**" इति नामकं किञ्चिच्चलनमतिमुख्यं भवति। तस्य च द्वेधा विभागः – भूमिचारि, आकाशचारि इति। नाट्यदशायां भूतले स्थित्वा यच्चलनादिकं क्रियते तत् भूमिचारि शब्देनाभिधीयते। पादौ पृथिवीतः उन्नीय यच्चलनं क्रियते तत् आकाशचारिशब्देन भण्यते। अत्रार्थे भरतमुनिः ३२ अङ्गहाराणां, ३० नृत्तहस्तविन्यासरीतीः स्वग्रन्थे दर्शयामास।

**नृत्यम्** – भरतस्य नाट्यशास्त्रे एषः प्रकारः यद्यपि नैव दर्शितः अथाप्यस्य सूक्ष्माः विषयाः तत्र तत्र तेन निरूपिताः। नन्दिकेश्वर-शार्ङ्गदेवाभ्यां एषः प्रकारः प्रस्तुतः। पद्यसहितं अथवा सङ्गीतपूर्वकं यदि कस्यचित् वृत्तान्तस्य मूकाभिनयपूर्वकप्रस्तुतिः क्रियते तर्हि तद् नृत्यत्वेनाभिधीयते। मुखगतभावैः, हस्तसंयोगेन, पाणिपादभ्यां इतस्ततः सञ्चारेण संपूर्णतया भावः अत्राभिव्यज्यते। नर्तकस्य चिन्तनसामर्थ्यम्, कल्पनाचातुर्यमेवेह प्रधानं भवति। अत्र नवरसाः, नायक-नायिकयोः भावः स्पष्टतया अभिव्यज्यते।

**नाट्यम्** – नृत्यकलायाः तार्त्तीयीकः भागः एषः। नृत्त-नृत्याभ्यां मिश्रितं नाट्यमित्यभिधीयते। कामपि पुराणप्रसिद्धां कथामाश्रित्य अनेकपात्रधारिसहितः अभिनयः यत्र क्रियते तस्य नाट्यत्वेन व्यवहारः।

**ताण्डवम्** – परमेश्वरशिष्यः तण्डुनामकः भरतं प्रति अध्यापितं नाट्यतन्त्रं ताण्डवमिति कथ्यते। करण-अङ्गहार-रेचकादिभिः चलनैर्युतं नृत्यं भरतं प्रति त्वया अध्यापयितव्य इति परमेश्वरेण तण्डुरादिष्टः। अस्मिन् नाट्यतन्त्रे सामर्थ्यस्य, बलस्य, कोपस्य, विजयस्य च विविधगतिभिः प्रदर्शनं मुख्यं भवति। परमेश्वर एव ताण्डवनृत्यस्य सृष्टिकर्ता इत्यैतिह्यम्। केषुचित् सन्दर्भेषु स्वयं भगवान् शिवः नटराजो भूत्वा कांश्चन वृत्तान्तान् ज्ञापयितुं ताण्डवनृत्यं चकार। तत्र करणागमे शिवस्य सप्त ताण्डवनृत्यान्यभिहितानि। तानि च यथा, आनन्दताण्डवम्, संध्याताण्डवम्, उमाताण्डवम्, त्रिपुरताण्डवम्, संहारताण्डवम्, कलिताण्डवम्, गौरीताण्डवञ्चेति।

**लास्यम्** – यत्र कोमलसहितचलनादिभिः शृङ्गाररससम्बद्धानां भावानामभिनयः क्रियते तत् लास्याख्यं नाट्यतन्त्रमिति उच्यते। अभिनयदर्पण-सङ्गीतरत्नाकरग्रन्थानुसारं पार्वती एवास्य तन्त्रस्य प्रणेत्री। पार्वती बाणासुरस्य पुत्र्याः उषायाः कृते कोमलनृत्यगतीः अध्यजीगपत्। ततश्च एषः नृत्यप्रकारः स्त्रीषु बाहुल्येन प्रसिद्धिमवाप। अत एवेदं स्त्रीप्रधानं नाट्यतन्त्रमित्यभिधीयते। नन्दिकेश्वरः स्वविरचिते अभिनयदर्पणाख्ये ग्रन्थे लास्यस्य सप्तप्रभेदान् उल्लेखयामास।

**मार्गी - देशीति नृत्यतन्त्रे** – चतुर्भ्यः वेदेभ्यः नाट्यसम्बद्धानंशानाद्धृत्य ब्रह्मणा सृष्टं मूलं नाट्यतन्त्रं मार्गीति पदेन व्यपदिश्यते। तदुत्तरं स्व-स्वप्रान्तीयभाषामनुसृत्य, सामाजिक-धार्मिकक्षेत्रमवलम्ब्य नाट्यतन्त्रे कानिचन परिवर्तनानि जातानि। एवं तत्तद्देशानुगुणं प्रचलितं नाट्यविधानं देशीति निगद्यते।

## नृत्यकलायामभिनयविमर्शः

भारतीयनाट्यकला अभिनयप्रधानास्ति। एषः अभिनयः चतुर्भिः प्रकारैः विभज्यते। आङ्गिकाभिनयः, वाचिकाभिनयः, आहार्याभिनयः, सात्त्विकाभिनयश्चेति। शरीरस्थितावयवानां गतिभिः भावस्य यत्र प्रदर्शनं तत्र आङ्गिकाभिनयः। पदोच्चारणेन अथवा गायनादिना भावस्य अभिव्यक्तौ सति सः वाचिकाभिनय इति कथ्यते। शरीरगतवस्त्राभरणादिभिः प्रेक्षकानामाकर्षणार्थं यः

अभिनयः क्रियते सः आहार्याभिनयः। मुखगतभावैः, नेत्राणां चलनादिना, मनोगतभावः यदि अभिव्यज्यते तर्हि सः सात्त्विकाभिनयः। एतैः चतुर्भिरभिनयैः युक्तमेव परिपूर्णं नृत्यमिति स्वीक्रियते। आहार्यादि चतुर्ष्वभिनयेषु प्रधानाभिनयः भवति आङ्गिकाभिनयः। तस्य च विभागद्वयम्। आद्ये विभागे दैहिकपरिप्लवस्य[१९] प्रामुख्यम् भवति। तत्र च अङ्ग-उपाङ्ग-प्रत्याङ्गेति पुनः त्रेधा विभागः। द्वितीये आङ्गिकाभिनये शरीरकम्प्रेण सह भावस्याप्यभिव्यक्तिः क्रियते। स च पुनः मुखजः, शरीरम्, चेष्टाकृतमिति भेदेन त्रिप्रकारको भवति।

**मुखजाभिनयः** – मुखजाभिनयः भरतस्य नाट्यशास्त्रे बाहुल्येन चर्चितः। अत्र शरीरगताः नानाविधभङ्ग्यः उपन्यस्ताः। मुखस्य चलनानि मनसः सूक्ष्मभावस्याभिव्यञ्जने अतीव प्रधानानि भवन्ति। व्यक्तिगतभावस्य दर्पणसदृशं भवति मुखम्। तस्मात् सकलविधभावः अपि मुखजाभिनयेन बहिः प्रकाश्यत इत्यतः एतदभिनयस्यास्ति अतीव प्रामुख्यम्। भाषाविषयकाज्ञानेऽपि मुखगताङ्गानामर्थपूर्णचलनेन वक्तव्यांशस्य अवबोधो जायते द्रष्टुः। अत एव भरतः अभिनयेषु मध्ये ईक्षणस्य अथवा आलोकनस्य अतीवप्राधान्यमित्यचकथत्। दृष्टिः अथवा दर्शनमभिनयस्य जीवातुभूतम्। अभिनयेषु अर्थाभिव्यक्तिः दर्शनस्य वैविध्येनैव ज्ञास्यते। एतमंशं मनसि निधायः दृष्टेः त्रैविध्यमुपवर्णितं नाट्यग्रन्थेषु यथा -

१) रसदृष्टिः – ८ भेदाः।[२०] स्थायिदृष्टिः – ४ भेदाः। सञ्चारिदृष्टिः – १६ भेदाः।

**शरीराभिनयः** – आङ्गिकाभिनयेषु कायं बहुमुख्यमङ्गं भवति। शरीरगतावयवानां कम्पनेन भावः यत्र अभिव्यज्यते स एव शरीराभिनयः। नाट्यस्य हृदयं मुखाभिनयश्चेत् नाट्यस्य तनु भवति शरीराभिनयः। शरीराभिनये मुख्यतया शिरसः, ग्रीवायाः, वक्ष्यसः, ऊर्वोः, पाणि-पादयोः, श्रोणिफलकस्य, प्रसृतयोः, प्रवेष्टयोश्च चलनादिकमवलोक्यते।

**हस्ताभिनयः** – हस्तयोः चलनं भावस्य अभिव्यक्तये अत्यन्तं सहजभूतमङ्गम्। हस्तचलनं नाट्यस्य विशिष्टसङ्केतत्वेन स्वीक्रियते। नाट्यकलायाः भाषा भवति हस्तचलनम्। तच्च गायननिष्ठपदानि सङ्केतपदत्वेन परिवर्तनं कुरुते। हस्तयोः कम्प्रेण नर्तकी अथवा नर्तकः बहुमुख्यां कथां विवृत्य, नर्त्यमानकृतेः अर्थं प्रेक्षकेभ्यः द्रष्टृभ्यः विज्ञापयति। हस्तयोः सुकोमलगत्या जीवनस्य सर्वाः अवस्थाः, सर्वेऽपि वृत्तान्ताः अभिव्यक्तुं शक्यन्ते। भारतीयनाट्यशास्त्रे हस्तचलनस्य विशिष्टं स्थानं शास्त्रकारादिभिः प्रदत्तं वर्तते। अर्थविहीनं किञ्चिदपि हस्तचलनं नाट्यकलायां नैव विधास्यते। तत्रापि हस्तयोः यः अञ्जलिभागः सः नाट्यप्रदर्शनस्य प्रधानं केन्द्रमित्युच्यते। नाट्यशास्त्रे प्रत्येकस्यापि हस्तचलस्य निष्कृष्टं विवरणम्, निष्कृष्टं लक्षणमभिहितं वर्तते। नाट्यशास्त्रसम्बद्धग्रन्थानुरोधेन हस्तचलनं त्रिविधं भवति। असंयुतहस्तम्, संयुतहस्तम्, नृत्तहस्तञ्चेति। यद्यपि विभिन्नेषु नाट्यग्रन्थेषु विभिन्नाः हस्तचलनप्रकाराः प्रदर्शिताः तथापि सर्वेषामपि ग्रन्थानां मूलं भवति भरतप्रणीतनाट्यशास्त्रमेव। तदनुरोधेन अधुनापि नाट्यकलायामुपयुज्यमानानि हस्तचलनानि इमानि २४ भवन्ति। पताकः, त्रिपताकः, कर्तरीमुखः, अर्धचन्द्रः, अरालः, शुकतुण्डः, मुष्टिः, शिखरः, कपित्थः, कटकामुखः, सूचीमुखः, पद्मकोशः, सर्पशिरः, मृगशिरा, काङ्गुलम्, अल्लपल्लवः, चतुरः, भ्रमरः, हंसस्यः, हंसपक्षः, संदंशः, मुकुलः, ऊर्णनाभः, ताम्रचूडश्चेति। एतानि चासंयुतहस्तचलनेऽन्तर्भवन्तीति विशेषः।

**नृत्ये रसस्य प्राशस्त्यम्**

भारतीयनृत्यकलायाः निरूपणावसरे अवश्यं रसनिरूपणं कर्तव्यमेव। यतोहि रसः भारतीयकलानां सर्वासामपि प्राणभूतं तत्त्वम्। "**न हि रसादृते कश्चिदर्थः प्रवर्तते**"[२१] इत्युक्तदिशा रसाभावे कलानां कल्पनैवासाध्या भवति। चित्रकला, शिल्पकला, सङ्गीतकला, नाट्यकला, नाटकमिति सर्वासामपि अन्तःशक्तिस्वरूपं भवत्येषः रसः। रसतत्त्वमित्यंशः भारतीयललितकलासु सर्वत्रापि दृश्यमानः कश्चन प्रवाहः। रसविहीनः अभिनयः न कस्यपि मनः तोषयति, निरर्थकश्च सः अभिनयो भवति। वस्तुतः वक्तव्यं चेत् रसस्य स्वरूपकथनम्, लक्षणप्रणयनं वा असाध्यम्। यतोहि स च रसः अनुभवमात्रवेद्यः। रस्यते आस्याद्यते इत्यर्थे रस् धातोः पचाद्यचि निष्पन्नः असौ रसशब्दः। तथा हि नाट्यग्रन्थेषु अमी अष्टौ रसाः प्रस्तुताः, यथा –

**"शृङ्गारवीरकरुणाद्भुतहास्यभयानकाः।**
**बीभत्सहास्यसंज्ञौ चेत्यष्टौ नाट्ये रसाः स्मृताः॥"**

यद्यपि भरतमुनिना अष्टावेव रसाः अभ्युपगताः अथाप्युत्तरवर्त्तिभिः शास्त्रकारैः "शान्तोऽपि नवमो रसः" इति नवमः शान्तरसः अभ्युपगतः।

मानसान्तर्गताः भावाः विभिन्नप्रकारैर्यदि अभिव्यज्यते स एव रस इति कथ्यते। तत्र भावः रसोत्पत्तौ हेतुर्वा अथवा रसः भावोत्पत्तौ कारणं वा इत्यत्र सन्ति नैके मतभेदाः।। यदि भावः रसं नोत्पादयति तर्हि तस्य नास्ति स्वारस्यम्। भावस्य अभिव्यक्त्यभावे रसोत्पत्तिरसाध्या। इत्थञ्च भावरसौ परस्परपोषकौ सन्तौ मनसः स्थितिमभिव्यञ्जयतः। भरतमुनिरित्थं ब्रवीति यत् –

**"न भावहीनोऽस्ति रसो न भावोत्रसवर्जितः।**

**परस्परकृता सिद्धिस्तयोरभिनये भवेत्"[२२] ॥ इति ॥**

**"विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः"** इति रसनिष्पत्तिविषयकं भरतसूत्रम्। रसोत्पत्तिजनकाः ४९ भावः नाट्यशास्त्रे अभिहिताः। ते च स्थायिभावः, सञ्चारिभावः, सात्त्विकभाव इति विभागत्रये विभक्ताः। रससम्बद्धविचारः अलङ्कारग्रन्थेषु बहुधा चर्चितः। प्रकृते तावत् नाट्यकलायां रसस्य प्राधन्यत्वोपपादनार्थमीषदिव सः विषयः प्रस्तुतः।

**उपसंहारः** – इत्थञ्च भारतीयललितकलासु नृत्यकलायाः महद्वैशिष्ट्यं वर्तते। किञ्च "न शक्यमस्य नाट्यस्य गन्तुमन्तं कथञ्चन" इत्युक्तरीत्या भारतीयनृत्यस्य व्यापकता अतिविस्तृता। नृत्यं हि सहृदयहृदयानि रञ्जयति, दुःखितं पुरुषं सान्त्वयति। आह्लादयति च मनः। समस्तलोकवृत्तस्य अवस्थानुकरणं नाट्याभिनयेन यथावदनुभोक्तुं शक्यम्। समेषामपि भावनामनुकीर्तनं भवति नाट्यम्। अलौकिकरसस्यास्वादकं च भवति। लोकं प्रति हितोपददेशे सरसभूतं साधनं च तत्। दुखितानां, श्रमावृत्तानां, पीडितानां च विश्रान्तिदायकं च भवति। आहत्य मानवकल्याणार्थं प्रवृत्तेषु सोपानेष्विदमप्यन्यतमं भवति। सन्दर्भेऽस्मिन् भरतमुनेः इदं वचनं नाट्यस्य गरिमां पौनःपुन्येन निगदति यथा –

**"दुःखार्तानां श्रमार्तानां शोकार्तानां तपस्विनाम्।**

**विश्रान्तिजननं काले नाट्यमेतन्मया कृतम्" ॥ इति।**

**संख्याबद्धपादटिप्पण्यः –**

१. मालविकाग्निमित्रम् – प्रथमोङ्कः
२. पा. सूत्रम् ३/१/११०
३. अमरकोशः १-७
४. दशरूपकम् १-६
५. ऋग्वेदः ५/८३/६
६. अथ. ४/९/८
७. ऐ. आर. १
८. अभिनवभारती १ – १५
९. नाट्यशास्त्रम्
१०. शिवप्रदोषस्तोत्रम् ४ – ५
११. नन्दिकेश्वरकाशिका १
१२. पा. सू. ४/३/११०
१३. पा. सू. ४/३/११
१४. महाभाष्यम् ३/१/२६
१५. महाभाष्यम् ६/१/२
१६. नाट्यशास्त्रम् १/११६
१७. चारी = पादः, जंघा, ऊरु, कटी
१८. पा. सू. ७/४/६८
१९. परिप्लवः – चलनम्

२०. कान्ता हास्या च करुणा रौद्री वीरा भयानका। बीभत्सा चाद्भुतेत्यष्टौ द्रष्टव्या रसदृष्टयः ॥ नन्दिकेश्वरकृतः भरतार्णवः ४-२३२

२१. नाट्यशास्त्रम् ६

२२. नाट्यशास्त्रम् ६ – ३७

**सन्दर्भग्रन्थसूची**


१) नाट्यशास्त्रम् हिन्दी अनुवादसहितम्, आचार्यभरतप्रणीतम्, डा. रघुवंश, मोतीलाल बनारसीदास, वाराणसी १९६४।

२) दशरूपकम्, धनञ्जयविरचितम्, सं. डा. त्रिपाठी रमाशङ्कर, विश्वविद्यालय प्रकाशन, वाराणसी, १९७३।

३) नाट्यशास्त्र, अभिनवभारतीसहित, सं. रामकृष्णकवि, गा.ओ.सी. १९५६।

४) नाट्यशास्त्रीय सन्दर्भ में दशरूपक, डा. गोपाल लाल मीणा, मनीषा प्रकाशन, वाराणसी, २०१४।

५) शिले – कले, डा. चूडामणि नन्दगोपाल, अल्ट्रा पब्लिकेशन, बेङ्गलूरु २०११।

६) नन्दिकेश्वर काशिका, उपमन्युकृतटीका सहिता, चौखम्बा विद्याभवन, वाराणसी १९९९।

७) भरतार्णवः, श्रीनन्दिकेश्वरविरचितः, चौखम्बा कृष्णदास अकाडमी, २०१३।